**Q.P. Code – 56641**

## First Year M.A. Degree Examination, DECEMBER 2017

## (Directorate of Distance Education)

*(Repeaters and Freshers)*

**Sanskrit**

**(DPA 510) Paper I – CLASSICAL SANSKRIT LITERATURE – I**

**Texts : 1) Kiratarjuneeyam of Bharavi I and II cantos**

**2) Mahaswetavrttanta of Kadambari**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***सूचना :*** *संस्कृतभाषया कन्नडभाषया आंग्लभाषया **वा** उत्तरितव्या।*

I. श्लोक**द्वयं** विवृणुत । **2 × 5 = 10**

(a) गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम्।।

(b) पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम्।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता।।

(c) तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम्।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः।।

II. **एकं** गद्यभागं सानुवादं व्याख्यात। **10**

(a) अन्यत्तु दक्षस्य प्रजापतेरति प्रभूतानां सुतानां मध्ये द्वे सुते मुनिररिष्टा च बभूवतुः। ताभ्यां गन्धर्वैः सह कुलद्वयं जातम्। एवमेतान्येकत्र चतुर्दश कुलानि। गन्धर्वाणां तु दक्षात्मजाद्रितयसम्भवं तदेव कुलद्वयं जातम्। तत्र मुनेस्तनयः चित्रसेनादीनां पञ्चदशानां भ्रातृणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः।

(अथवा)

(b) इत्युक्तवती तस्मिन् स तपोधन युवा किञ्चिदुपदर्शित स्मितो मामवादीत् – अयि कुतूहलिनि! किमनेन प्रश्नायासेन यदि रुचितसुरभिपरिमला तदा गृह्यतामियं इत्युक्त्वा समुपसृत्यात्मीयात् श्रवणात् अपनीय कलैरलिकुलक्वणितैः प्रारब्ध समागम प्रार्थनामिव मदीये श्रवणपुटे तामकरोत्। मम तु तत्करतलस्पर्श लोभेन तत्क्षणमपरमिव पारिजात कुसुमावतंस स्थाने पुलकमासीत्।

 **P.T.O.**

III. (a) किरातार्जुनीयस्य वैशिष्ट्यं संगृह्य लिखत। **10**

**(अथवा)**

(b) महाकाव्यलक्षणं विवृणुत।

IV. (a) बाणभट्टस्य देश–काल–कृति विषये प्रबन्धमारचयत। **10**

**(अथवा)**

(b) पुण्डरीकवर्णनम् यथाग्रन्थं कुरुत।

V. **'क'** विभागतः **द्वयं 'ख'** विभागतः **द्वयं** सप्रसङ्ग व्याख्यात। **4 × 2½ = 10**

**'क' विभागः**

(a) अहो दुरन्ता बलवद्विरोधिता।

(b) हितं मनोहारि च दुर्लभं वचः।

(c) प्रवक्तुमिच्छन्ति मृषा हितैषिणः।

**'ख' विभागः**

(d) मूढो हि मदनेनायास्यते।

(e) अतिभूमिमयं गतो न शक्यते निवर्तयितुम्।

(f) सर्वथा दुर्लभं यौवनमस्खलितम्।

VI. (a) संस्कृतभाषायां अनुवादं कुरुत। (**केवलं कन्नड–आंग्लमाध्यमाभ्यर्थिनां कृते**) **10**

Kalidasa is most honoured poet in India. He is referred by all in world literature. He has written 3 dramas, 2 mahakavyas and two khandakavyas. Many more texts are there in his name. Three dramas are – Vikramorvasheeyam, Malavikagnimitram, Abhijnana Shakuntalam. Two mahakavyas are – Raghuvamsha and Kumara Sambhava. Two kandakavyas are – Meghadoota and Ritusamhara.

ಕಾಳಿದಾಸನು ಭರತ ಖಂಡದ ಸಂಸ್ಕೃತ ಕವಿಗಳಲ್ಲಿ ಅದ್ವಿತೀಯನಾದ ಮಹಾಕವಿ. ವಿಶ್ವ ಸಾಹಿತ್ಯದಲ್ಲಿ ಈತನಿಗೆ ಪೂಜ್ಯ ಸ್ಥಾನವಿದೆ. ಈತನು ಮೂರು ನಾಟಕಗಳನ್ನು, ಎರಡು ಮಹಾಕಾವ್ಯಗಳನ್ನು ಹಾಗೂ ಎರಡು ಖಂಡ ಕಾವ್ಯಗಳನ್ನು ರಚಿಸಿದ್ದಾನೆ. ಇನ್ನೂ ಅನೇಕ ಕೃತಿಗಳು ಅವನ ಹೆಸರಿನಲ್ಲಿ ರಚಿತವಾಗಿವೆ. ಈತನ ಮೂರು ನಾಟಕಗಳು ವಿಕ್ರಮೋರ್ವಶೀಯ, ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರ ಹಾಗೂ ಅಭಿಜ್ಞಾನ ಶಾಕುಂತಲ, ಎರಡು ಮಹಾಕಾವ್ಯಗಳು – ರಘುವಂಶ ಹಾಗೂ ಕುಮಾರ ಸಂಭವ, ಎರಡು ಖಂಡಕಾವ್ಯಗಳು – ಮೇಘದೂತ ಹಾಗೂ ಋತುಸಂಹಾರ.

(b) कन्नडभाषायां आंग्लभाषायां **वा** अनुवादं कुरुत (**केवलं आंग्लकन्नडमाध्यमाभ्यर्थिनां कृते**) **10**

आदौ धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वृद्धत्वे भोज इति पुत्रः समजनि। स यदा पञ्चवार्षिकस्तदा पिता ह्यात्मानो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं वीक्ष्य विचारयामास।

VII. सूक्ति**द्वयस्य** अर्थविस्तरणं कुरुत। (**केवलं संस्कृत माध्यमाभ्यर्थिनां कृते**) **20**

(a) विद्या नाम नरस्य रूपमधिकम्।

(b) उदारचरितानां तु वसुधैव कुटुम्बकम्।

(c) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।

**FOR FRESHERS ONLY**

VIII. (a) भारवेः देश–काल–कृति विषये प्रबन्धं लिखत। **10**

**(अथवा)**

(b) गद्यकाव्यस्य उद्गममधिकृत्य प्रबन्धमारचयत।

**Q.P. Code – 56642**

**First Year M.A. Degree Examination, DECEMBER 2017**

**(Directorate of Distance Education)**

**Sanskrit**

**(DPA 520) Paper II – CLASSICAL LITERATURE – II**

**Texts : 1) Drama – Abhijnana Shakuntalam**

**2) History of Classical Sanskrit Literature**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***सूचना :*** *संस्कृतभाषया कन्नडभाषया आंग्लभाषया **वा** उत्तरितव्या।*

I. (a) (i) दुष्यन्तस्य पात्रचित्रणं कुरुत। **10**

(अथवा)

(ii) 'उपमा कालिदासस्य' विमृशत।

(b) **द्वे** अधिकृत्य लघुटिप्पणी लिखत । **2 × 3 = 6**

(i) विष्कम्भकः।

(ii) अनसूया।

(iii) धीवरः।

(iv) मारीचमहर्षिः।

II. (a) अधोनिर्दिष्टेषु **द्वौ** अनूद्य विवृणुत। **2 × 5 = 10**

(i) कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्।

(ii) जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि।।

(iii) त्वं दूरमपि गच्छन्ती हृदयं न जहाति मे।
दिवाऽवसाने च्छायेव पुरो मूलं वनस्पते।।

(iv) यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम्।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः।।

(b) अधोनिर्दिष्टेषु **त्रीणि** ससन्दर्भं व्याख्यात। **3 × 3 = 9**

(i) बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।

(ii) सर्वः खलु कान्तमात्मानं पश्यति।

(iii) पौरव! रक्ष रक्ष विनयम्, इतस्ततः ऋषयः सञ्चरन्ति।

(iv) यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।

(v) मार्जारगृहीत उन्दुरुरिव निराशोऽस्मि जीविते।

III. संस्कृतसाहित्यक्षेत्रं प्रति माघस्य भारवेः **वा** योगदानम् विमर्शयत। **10**

IV. संस्कृतरूपकेषु 'मृच्छकटिकस्य' 'मुद्राराक्षसस्य' **वा** वैशिष्ट्यम् लिखत। **10**

V. संस्कृतरूपकक्षेत्रे 'उत्तररामचरितस्य' 'वेणीसंहारस्य' **वा** स्थानं विमृशत। **10**

VI. **द्वे** अधिकृत्य लघुटिप्पणी लिखत। **2 × 2½ = 5**

(a) अश्वघोषः।

(b) खण्डकाव्यम्।

(c) बाणभट्टः।

(d) नलचम्पू।

**FOR FRESHERS ONLY**

VII. (a) संस्कृतसाहित्यस्य प्रमुख नीतिकाव्यान् अधिकृत्य प्रबन्धं लिखत। **10**

**(अथवा)**

(b) 'नाटकान्तं कवित्वम्' विस्तरत।

---

Q.P. Code – 56643

## First Year M.A. Degree Examination, DECEMBER 2017

## (Directorate of Distance Education)

*(For Repeaters and Freshers)*

## Sanskrit

## (DPA 530) Paper III – VYAKARANA AND BHARATIYA TATTVA SHASTRA

**Texts : 1) Siddhanta Kaumudi (From Karaka to Pradisamasa)**

**2) Nyayasutra (I and II chapters)**

**3) Sarvadarshana Sangraha (Charvaka, Bauddha, Ramanuja and Poornaprajna Darshana's only)**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***सूचना :*** *संस्कृतभाषया कन्नडभाषया आंग्लभाषया **वा** उत्तरितव्या।*

I. **चत्वारि** सूत्राणि सोदाहरणं विवृणुत। **4 × 2.5 = 10**

(a) कर्मणि द्वितीया।

(b) कर्तृकरणयोस्तृतीया।

(c) चतुर्थी संप्रदाने।

(d) भीत्रार्थानां भयहेतुः।

(e) षष्ठी शेषे।

(f) सहयुक्तेऽप्रधाने।

II. "पाणिनीयं सर्वशास्त्रोपकारकं" – समर्थयत। **5**

III. **चतुर्णां** सप्रमाणं विग्रहवाक्यानि लिखत। **4 × 2.5 = 10**

(a) राजपुरुषः। (b) उपकृष्णम्।

(c) त्रिनेत्रः (d) यथाशक्तिः।

(e) हरित्रातः (f) नीलोत्पलम्।

IV. (a) न्यायसूत्रमनुसृत्य शब्दप्रमाणं निरूपयत। **10**

**(अथवा)**

(b) न्यायसूत्रानुसारेण पञ्चावयवान् प्रतिपादयत।

V. (a) **त्रीणि** सूत्राणि विवृणुत। **3 × 3 = 9**

(i) इन्द्रियार्थसन्निकर्षोत्पन्न ज्ञानं प्रत्यक्षम्।

(ii) आप्तोपदेशः शब्दः।

(iii) भोक्त्व्या इन्द्रियार्थाः।

(iv) विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्।

(b) न्यायसूत्रानुसारं **त्रयाणां** लघुटिप्पणीः लिखत। **3 × 2 = 6**

(i) इन्द्रियाणि।

(ii) आत्मा।

(iii) प्रमाणम्।

(iv) प्रयोजनम्।

VI. (a) (i) "प्रत्यक्षमात्रं प्रमाणम्" चार्वाकानुसारं साधयत। **11**

**(अथवा)**

(ii) रामानुजमतानुसारं चत्वारि ब्रह्मसूत्रान् विवृणुत।

(b) **त्रीण्य**धिकृत्य लघुटिप्पणीः लिखत। **3 × 3 = 9**

(i) बौद्धमते पञ्चविधः स्कन्धः।

(ii) पूर्णप्रज्ञदर्शने पञ्चभेदाः।

(iii) प्राप्तिसंवादोपपत्ति।

(iv) पदार्थनिरूपणम्।

**FOR FRESHERS ONLY**

VII. (a) चार्वाकमतस्य सारं सङ्गृहूणीत। **10**

**(अथवा)**

(b) न्यायसूत्रानुसारेण प्रमाण–प्रमेयं विवृणुत।

---

**Q.P. Code – 56644**

**First Year M.A. Degree Examination, DECEMBER 2017**

**(Directorate of Distance Education)**

*(For Repeaters and Freshers)*

**Sanskrit**

**(DPA 540) Paper IV – SPECIAL ALANKARA – I**

**Texts : 1) Appayya Dixita's Kuvalayananda (Upama to Vyatireka)**

**2) Dhvanyaloka – 1 to 2 chapters only**

**3) Theories of Alankara and Riti**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***सूचना :*** *संस्कृतभाषया कन्नडभाषया आंग्लभाषया वा उत्तरितव्या।*

I. अलंकारशास्त्रंप्रति वामनस्य दण्डिनः **वा** योगदानं निरूपयत। **10**

II. **चतुर्णां** अधिकृत्य सोदाहरणं विवृणुत। **4 × 3 = 12**

(a) उपमा। (b) उल्लेखः।

(c) दृष्टान्तः। (d) भ्रान्तिमान्।

(e) सन्देहः। (f) अनन्वयः।

III. उत्प्रेक्षालङ्कारं अपह्नुतिं **वा** सोदाहरणं विवृणुत। **10**

IV. अलङ्कार**द्वयं** निर्दिश्य व्याख्यात। **2 × 4 = 8**

(a) धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि।

(b) नायं सुधांशुः किं तर्हि व्योमगंगासरोरुहम्।

(c) उक्तानुक्तास्पदाद्यत्र सिद्धासिद्धास्पदे परे।

(d) इन्दुरिन्दुरिवश्रीमान् इत्यादौ तदनन्वयः।

V. (a) ध्वनिस्वरूपं विवृणुत। **10**

**(अथवा)**

(b) ध्वन्यालोकस्य मङ्गलश्लोके स्थितं त्रिविधध्वनितत्वं वर्णयत।

VI. अधोनिर्दिष्टेषु **द्वयं** व्याख्यात। **2 × 4 = 8**

(a) बहुधा व्याकृतः सोऽन्यैः ततो नेह प्रतन्यते।

(b) तदुपायतया तद्वदर्थो वाच्ये तदादृतः।

(c) यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवे।

(d) यथा पदार्थद्वारेण वाक्यार्थः संप्रतीयते।

VII. अधोनिर्दिष्टेषु **चतुर्णां** काव्यसौन्दर्यं विवृणुत। **4 × 3 = 12**

(a) आहूतोऽपि सहायैरोमित्युक्त्वा विमुक्तनिद्रोऽपि।
गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति।।

(b) कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।
सभ्रमरपद्मघ्रायिणि वारितवामे सहस्वेदानीम्।

(c) शिखिपिच्छकर्णपूरा जाया व्याधस्य गर्विणी भ्रमति।
मुक्ताफलारचितप्रसाधनानां मध्ये सपत्नीनाम्।

(d) उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया निशामुखम्
पुरोऽपि रागाद्गलितं न लक्षितम्।।

(e) व्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि।
मा तवापि तया विना दाक्षिण्यहतस्य जनिषत।

(f) परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो
यदीयः सर्वेषामिहखलु विकारोऽप्यभिमतः।
न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः।।

**FOR FRESHERS ONLY**

VIII. (a) कुवलयानन्दग्रन्थस्य महत्वं विशदयत। **10**

**(अथवा)**

(b) 'प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्' चर्चयत।

---